

**OM SRI SAIRAM**

**OM NAMASTE ASTU BHAGAWAN VISWESWARAYA MAHADEVAYA TRIYAMBAKAYA TRIPURANTHAKAYA TRIKAGNIKALAYA KALAGNIRUDRAYA NILAKANTHAYA MRITYUMJAYAYA SARVESWARAYA SADASIVAYA SRIMAN MAHADEVAYA NAMAHA**

# Ati Rudra Maha Yajnam (ARMY) Badrinath 2015

# Daily Sadhana

# Table of Contents

**ARMY Badrinath 2015 Daily Sadhana**
Inspiration – HIS Journey
Sadhana Guidance
3 OMs
Ganapati Prardhana
3 Gayatri
Sri Rudram
Durga suktam
Purusha suktam
Narayana suktam
3 Sai Gayatri
Kshama Prardhana
Shanti Mantras

# ARMY Badrinath 2015 Daily Sadhana

## Inspiration – HIS Journey

ARMY 2015 at Badrinath is an offering to Bhagawan Sri Sathya Sai Baba commemorating 90th year of Advent of Avatar and 54 years of Bhagawan's visit to Badrinath during which HE revitalized the spiritual energy at this






epicenter of Sanatana Dharma. The following is an excerpt from Bhagwan's Badrinath Yatra as narrated by Prof. Kasturi.

(source: http://media.radiosai.org/journals/Vol_02/05March01/02_Cover_Story/baba_to_badarinath.htm)


*"During the morning Abhishekam to the idol of Badrinarayana, while Baba was inside the temple facing the shrine, about 8.15AM, Baba mysteriously materialised a four armed Narayana icon with Sankha, Chakra, Gada and Padma, about 12 inches , perhaps sublimating in that form the Divine Essence of the Narayana Tejas before Him. He also created a charming thousand petalled 'gold' Lotus, and before the wonder of the people around Him could express itself in an awe striken gasp, He waved His hand before the Shrine and, lo, there was a Jyothirlinga in His palm, which He placed on the shining Lotus. Baba came away to the Dharmasala with the devotees and the large number of officers and citizens of Badrinath. Their Excellencies also soon joined the gathering.*
*Materialising a 'silver' Abhisheka Vessel full of holy water from Gangothri itself (as He announced), Baba Himself performed Abhisheka to that translucent Nethra Lingam. He had graciously taken the Linga round to everyone and made all to wonder at its quit effulgence and at a clearly visible Eye that was somehow incorporated in it. Devotees recited **Sri Rudram, Purushasuktham and Narayana Suktham, while Baba was pouring the sacred water on the Lingam.** Then, Baba created 108 miniature Bilva leaves or rather replicas of that holy leaf, in 'gold'; they fell in a lightning shower from His Palm on to a silver plate. He again waved His Hand and this time, O Blessed moment, 108 actual 'thumme' flowers fresh with even the touch of the morning dew, fell from that Divine Palm! With these, Baba directed Dr.B.Ramakrishna Rao, presumably on behalf of all assembled to do Puja to the Linga, the Ashtottara Puja, as mentioned in the Sastras. After Puja, Baba collected the Abhisheka Ganga and gave a share of it to each one, Himself pouring it into the mouth with His own merciful Hand.*
*Needless to say, the Lingam, one of the Five, which according to Baba, Sankaracharya brought from Kailasa, and which he installed in a sacred spot in the shrine to vivify the Badarikasram returned to the place from which Baba had drawn it for this epoch making ritual of re invigoration."*

**MAY HE REVITALIZE THE DIVINITY WITHIN US TO LOVE ALL SERVE ALL**

## Sadhana Guidance

The intent of the sadhana is to purify our body, mind, and senses. Purity leads to divinity and unity.

- Daily Prayers are a must. Choose a specific time and place as much as possible.
- Dedicate 30 min for daily prayers without multitasking with other activities such as driving, daily chores, etc.
- Partake sattwik vegetarian food. Eating meat, drinking alcohol, smoking, etc. are prohibited.
- Minimize distractions from senses such as watching television, movies, etc.
- Practice spiritual silence and chant God's name internally as much as possible.



ॐ ॐ ॐ

om om om

गणानां त्वा गणपतिगं हवामहे कविं कवीना-मुपमश्रवस्तमं।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः श्रृण्व न्नूतिभिस्सीद सादनं॥
gaṇānāṁ tvā gaṇapatigṁ havāmahe kaviṁ kavīnā-mupamaśravastamaṁ |
jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ā naḥ śṛṇva nnūtibhissīda sādanaṁ ||

प्रणो देवी सरस्वती वाजेभिर् वाजिनीवति। धीनामवित्र्यवतु॥
praṇo devī sarasvatī vājebhir vājinīvati | dhīnāmavitryavatu ||

गणेशाय नमः। सरस्वत्यै नमः। श्री गुरुभ्यो नमः। हरिः ॐ॥
gaṇeśāya namaḥ | sarasvatyai namaḥ | śrī gurubhyo namaḥ | hariḥ om ||

ॐ भू-र्भुव-स्सुवः।
तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥३
om bhū-rbhuva-ssuvaḥ |
tathsaviturvareṇyaṁ bhargo devasya dhīmahi |
dhiyo yo naḥ pracodayāt ||(3)

ॐ शांतिः शांतिः शांतिः
om śāntiḥ śāntiḥ śāntiḥ

श्रीसायीश्वराय नमः। हरिः ॐ।
śrīsāyīśvarāya namaḥ | hariḥ om |

ॐ अस्य श्री रुद्राध्याय प्रश्न महामन्त्रस्य
om asya śrī rudrādhyāya praśna mahāmantrasya

अघोर ऋषिः। अनुष्टुप् छन्दः। सन्कर्षण मूर्ति स्वरूपो योसऽवादित्यः।
aghora ṛṣiḥ | anuṣṭup chandaḥ | sankarṣaṇa mūrti svarūpo yosa'vādityaḥ|

परमपुरुषः स एष रुद्रो देवता।
paramapuruṣaḥ sa eṣa rudro devatā |

नमः शिवायेति बेजं। शिवतरायेति शक्तिः। महादेवायेति केलकं।
namaḥ śivāyeti beejaṁ | śivatarāyeti śaktiḥ | mahādevāyeti keelakaṁ |

श्रे साम्ब सदाशिव प्रसाद सिध्द्यर्थे जपे विनियोग।
śree sāmba sadāśiva prasāda sidhdyarthe jape viniyoga |

ॐ नमः शंभवेच अग्निहोत्रात्मने अन्गुष्ठाभ्यां नमः।
om namaḥ śambhaveca agnihotrātmane anguṣṭhābhyāṁ namaḥ |

मयोभवेच दर्शपोर्ण मासात्मने तर्जनेभ्यां नमः।
mayobhaveca darśapoorṇa māsātmane tarjaneebhyāṁ namaḥ |

नमः शम्करायच चातुर्मास्यात्मने मध्यमाभ्यां नमः।
namaḥ śamkarāyaca cāturmāsyātmane madhyamābhyāṁ namaḥ |

मयस्करायच निरूढ पशु बन्धात्मने अनामिकाभ्यां नमः।
mayaskarāyaca nirūḍha paśu bandhātmane anāmikābhyāṁ namaḥ |

नमः शिवायच ज्योतिश्टोमात्मने कनिश्ठिकाभ्यां नमः।
namaḥ śivāyaca jyotiśṭomātmane kaniśṭhikābhyāṁ namaḥ |

शिवतरायच सर्व क्रत्वात्मने करतल करप्ष्ठाभ्यां नमः॥
śivatarāyaca sarva kratvātmane karatala karapr̆ṣṭhābhyāṁ namaḥ ||

ॐ नमः शंभवेच अग्निहोत्रात्मने हृन्दयाय नमः ।

om namaḥ śambhaveca agnihotrātmane hṙdayāya namaḥ |

मयोभवेच दर्शपोर्ण मासात्मने शिरसे स्वाहा ।

mayobhaveca darśapoorṇa māsātmane śirase svāhā |

नमः शम्करायच चातुर्मास्यात्मने शिखायै वशट् ।

namaḥ śamkarāyaca cāturmāsyātmane śikhāyai vaśaṭ |

मयस्करायच निरूढ पशु बन्धात्मने कवचाय हुम् ।

mayaskarāyaca nirūḍha paśu bandhātmane kavacāya hum |

नमः शिवायच ज्योतिश्टोमात्मने नेत्रत्रयाय वोषट् ।

namaḥ śivāyaca jyotiśṭomātmane netratrayāya vouṣaṭ |

शिवतरायच सर्व क्रत्वात्मने  अस्त्राय फट् ॥

śivatarāyaca sarva kratvātmane  astrāya phaṭ ||

भोर्भुवस्सुवरोमिति दिग्बन्धः ॥

bhoorbhuvassuvaromiti digbandhaḥ ||

ध्यानं

शुध्ध स्फटिक संकाशं शुध्धविद्या प्रदायकं ।

शुध्धं पूर्णम् चिदानन्दं सदाशिव महं भजे ॥

dhyānaṁ
śudhdha sphaṭika saṅkāśaṁ śudhdhavidyā pradāyakaṁ |
śudhdhaṁ pūrṇam cidānandaṁ sadāśiva mahaṁ bhaje ||

आपाताळ नभ स्थलान्त भुवनत् ब्रह्मान्ड माविस्फुरत

ज्योतिः स्फाटिक लिन्ग मोळिविलसत् पूर्णेन्दु वान्ताम्न्तैः ।

अस्तोकाप्लुत मेक मेश मनिशं रुद्रानुवाकान्जपन्

ध्याये देप्सित सिद्धये ध्रुवपदं विप्रोभिषिन्चे - च्छिवं ॥

āpātāḻa nabha sthalānta bhuvanat brahmāṇḍa māvisphurat
jyotiḥ sphāṭika linga mouḻivilasat pūrṇendu vāntāmṝtaiḥ ।
astokāpluta meka meeśa maniśaṁ rudrānuvākānjapan
dhyāye deepsita siddhaye dhruvapadaṁ viprobhiṣince - cchivaṁ ।।

ब्रह्मान्ड व्याप्त देह भसित हिम रुचा भासमाना भुजन्गैः ।

कन्ठे कालाः कर्पदाकलित शशिकला - श्चन्ड कोदन्ड हस्ताः ॥

त्र्यक्षा रुद्राक्षमाला प्रणतभयहराः शाम्भवा मूर्तिभेदा ।

रुद्राः श्रेरुद्रसूक्तः प्रकटितविभवा नः प्रयच्छन्तु सोख्यं ॥

brahmāṇḍa vyāpta deha bhasita hima rucā bhāsamānā bhujangaiḥ ।
kanṭhe kālāḥ karpadākalita śaśikalā - ścanḍa kodanḍa hastāḥ ।।
tryakṣā rudrākṣamālā praṇatabhayaharāḥ śāmbhavā mūrtibhedā ।
rudrāḥ śreerudrasūktaḥ prakaṭitavibhavā naḥ prayacchantu soukhyaṁ ।।

ॐ शं च मे ............. सुदिनम् चमे ॥

om śaṁ ca me .............sudinam came ।।

ॐ शांतिः शांतिः शांतिः

om śānti̱ḥ śānti̱ḥ śāntiḥ

# ॥ श्री रुद्रप्रश्नः ॥

## || Śrī Rudrapraśnaḥ ||

ॐ ग॒णानां᳚ त्वा ग॒णप॑तिꣳ हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमं। ज्ये॒ष्ठ॒राजं॒ ब्रह्म॑णां ब्रह्मणस्पत॒ आ नः॑ शृ॒ण्वन्नू॒तिभि॑स्सीद॒ साद॑नं॥ ॥ ॐ श्री महागणपतये नमः॥

**om ga̱ṇānā̎ṁ tvā ga̱ṇapa̍tim̐ havāmahe ka̱viṁ ka̍vī̱nāmu̍pa̱maśra̍vastamaṁ। jye̱ṣṭ̱ha̱rāja̱ṁ brahma̍ṇāṁ brahmaṇaspata̱ ā na̍ḥ śṛ̱ṇvannū̱tibhi̍ssīda̱ sāda̍naṁ || || om śrī mahāgaṇapataye namaḥ ||**

॥ ॐ नमो भगवते॑ रुद्रा॒य॥

**|| om namo bhagavate̍ rudrā̱ya ||**

# अनुवाक - १

## Anuvāka - 1

ॐ नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नम॑ः।

नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नम॑ः॥

**om namaste rudra manyava utota iṣave namaḥ।**
**namaste astu dhanvane bāhubhyāmuta te namaḥ।।**

या त॒ इषु॑ः शि॒वत॑मा शि॒वम् ब॒भूव॑ ते॒ धनु॑ः।

शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय॥

**yā ta iṣuḥ śivatamā śivam babhūva te dhanuḥ।**
**śivā śaravyā yā tava tayā no rudra mṛḍaya।।**

या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी।

तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि॥

**yā te rudra śivā tanūraghorā'pāpakāśinī ।**
**tayā nastanuvā śantamayā giriśantābhicākaśīhi।।**

यामिषु॑ं गिरिशंत॒ हस्ते॒ बिभ॒र्ष्यस्त॑वे।

शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हि॑ꣳसीः॒ पुरु॑षं॒ जग॑त्॥

**yāmiṣuṁ giriśaṁta haste bibharṣyastave।**
**śivāṁ giritra tāṁ kuru mā hiṁsīḥ puruṣaṁ jagat ।।**

शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑वदामसि।

यथा॑ न॒ः सर्व॒मिज्जग॑द॒यक्ष्मꣳ सु॒मना॒ अस॑त्॥

**śivena vacasā tvā giriśācchāvadāmasi ।**
**yathā naḥ sarvamijjagadayakṣmaṁ sumanā asat ।।**

अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक्।

अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः॥

adhyavocadadhivaktā prathamo daivyo bhiṣak ।
ahīm̐śca sarvāñjambhayantsarvāśca yātudhānyaḥ ।।

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।

ये चेमाꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे॥

asau yastamro aruṇa uta babhruḥ sumaṅgalaḥ ।
ye cemām̐ rudrā abhito dikṣu śritāḥ sahasraśo'vaiṣām̐ heḍa īmahe ।।

असौ योऽवसर्पति नीलग्रीवो विलोहितः।

उतैनं गोपा अदृशन्नदृशन्नुदहार्यः॥

asau yo'vasarpati nīlagrīvo vilohitaḥ ।
utainaṁ gopā adṛśannadṛśannudahāryaḥ ।।

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः।

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे॥

utainaṁ viśvā bhūtāni sa dṛṣṭo mṛḍayāti naḥ ।
namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe ।।

अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः।

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्॥

atho ye asya satvāno'haṁ tebhyo'karan namaḥ ।
pramuñca dhanvanastvamubhayorārtniyorjyām ।।

याश्च ते हस्त इषवः परा ता भगवो वप।

अवतत्य धनुस्तवꣳ सहस्राक्ष शतेषुधे॥

yāśca te hasta iṣavaḥ parā tā bhagavo vapa ।
avatatya dhanustavam̐ sahasrākṣa śateṣudhe ।।

निशीर्य शल्यानां मुखा शिवो नः सुमना भव।

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत॥

**niśīrya śalyānām mukhāa śivo naḥ sumanā bhava |**
**vijyaṁ dhanuḥ kapardino viśalyo bāṇavām̐ uta ||**

अनेशन्नस्येषव आभुरस्य निषङ्गथिः।

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः॥

**aneśannasyeṣava ābhurasya niṣaṅgathiḥ |**
**yā te hetirmīḍhuṣṭama haste babhūva te dhanuḥ ||**

तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज।

नमस्ते अस्त्वायुधायानातताय धृष्णवे॥

**tayā'smān viśvatastvamayakṣmayā paribbhuja |**
**namaste astvāyudhāyānātatāya dhṛṣṇave ||**

उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने।

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः॥

अथो य इषुधिस्तवारे अस्मन्निधेहि तम्।

**ubhābhyāmuta te namo bāhubhyām tava dhanvane |**
**pari te dhanvano hetirasmānvṛṇaktu viśvataḥ ||**
**atho ya iṣudhistavāre asmannidhehi tam |**

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय

नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः॥

**namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya tripurāntakāya**

**trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya sadāśivāya**

**śrīmanmahādevāya namaḥ ||**

# अनुवाक - २

## Anuvāka - 2

नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नमो॒ नमः॑ स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒ नमो॑ बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑नां॒ पत॑ये॒ नमो॒ नमो॒ हरि॑केशयोपवी॒तिने॑ पु॒ष्टाणं॒ पत॑ये॒ नमो॒ नमो॑ भ॒वस्य॑ हे॒त्यै जग॑तां॒ पत॑ये॒ नमो॒ नमो॑ रु॒द्राया॑तता॒विने॒ क्षेत्रा॑णां॒ पत॑ये॒ नमो॒ नम॑स्सू॒तायाह॑न्त्याय॒ वना॑नां॒ पत॑ये॒ नमो॒ नमो॒ रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणं॒ पत॑ये॒ नमो॒ नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒ कक्षा॑णां॒ पत॑ये॒ नमो॒ नमो॑ भुवं॒तये॑ वारिवस्कृ॒तायौष॑धीनां॒ पत॑ये॒ नमो॒ नम॑ उ॒च्चैर्घो॑षायाक्र॒न्दय॑ते पत्ती॒नाम् पत॑ये॒ नमो॒ नमः॑ कृत्स्नवी॒ताय॒ धाव॑ते॒ सत्त्व॑नां॒ पत॑ये॒ नमः॑॥२॥

namo̱ hira̍ṇyabāhave senā̱nye̍ di̱śāṁ ca̱ pata̍ye̱ namo̱ namo̍ vṟkṣebhyo̱ hari̍keśebhyaḥ paśū̱nāṁ pata̍ye̱ namo̱ nama̍ḥ sa̱spiñja̍rāya̱ tviṣi̍mate pathī̱nāṁ pata̍ye̱ namo̱ namo̍ babhlu̱śāya̍ vivyā̱dhine'nnā̍nā̱ṁ pata̍ye̱ namo̱ namo̱ hari̍keśyopavī̱tine̍ pu̱ṣṭāṇa̱ṁ pata̍ye̱ namo̱ namo̍ bha̱vasya̍ he̱tyai jaga̍tā̱ṁ pata̍ye̱ namo̱ namo̍ ru̱drāyā̍tatā̱vine̱ kṣetrā̍ṇā̱ṁ pata̍ye̱ namo̱ nama̍ssū̱tāyāhantyāya̱ vanā̍nā̱ṁ pata̍ye̱ namo̱ namo̱ rohi̍tāya stha̱pata̍ye vṟkṣāṇa̱ṁ pata̍ye̱ namo̱ namo̍ ma̱ntriṇe̍ vāṇi̱jāya̱ kakṣā̍ṇā̱ṁ pata̍ye̱ namo̱ namo̍ bhuva̱ṁtaye̍ vārivaskṟtāyauṣa̍dhīnā̱ṁ pata̍ye̱ namo̱ nama̍ u̱ccairgho̍ṣāyākra̱ndaya̍te pattī̱nām pata̍ye̱ namo̱ nama̍ḥ kṛtsnavī̱tāya̱ dhāva̍te̱ sattva̍nā̱ṁ pata̍ye̱ nama̍ḥ ||2||

# अनुवाक - ३

## Anuvāka - 3

नमः॒ सह॑मानाय निव्या॒दिन॑ आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒ नम॑ः ककु॒भाय॑ निष॒ङ्गिणे॑ स्ते॒नानां॒ पत॑ये॒ नमो॒ नमो॑ निष॒ङ्गिण॑ इषुधि॒मते॒ तस्क॑राणां॒ पत॑ये॒ नमो॒ नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्तायू॒नां पत॑ये॒ नमो॒ नमो॑ निचे॒रवे॑ परि॒च॒रायार॑ण्यानां॒ पत॑ये॒ नमो॒ नम॑ः सृका॒विभ्यो॒ जिघा॑ꣳसद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒ नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒चर॑द्भ्यः प्रकृ॒न्तानां॒ पत॑ये॒ नमो॒ नम॑ उष्णी॒षिने॑ गिरि॒च॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नमो॒ नम॒ इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नमो॒ नम॑ आतन्वा॒नेभ्य॑ प्रति॒दधा॑नेभ्यश्च वो॒ नमो॒ नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमो॒ नमोऽस्य॑द्भ्यो॒ विध्य॑द्भ्यश्च वो॒ नमो॒ नम॒ आसी॑नेभ्य॒ः शया॑नेभ्यश्च वो॒ नमो॒ नम॑ः स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒ नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमो॒ नम॑ः स॒भाभ्य॑ः स॒भाप॑तिभ्यश्च वो॒ नमो॒ नमो॒ अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नम॑ः ॥ ३ ॥

**namaḥ sahamānāya nivyādina āvyādhinīnāṁ pataye namo namaḥ kakubhāya niṣaṅgiṇe stenānāṁ pataye namo namo niṣaṅgiṇa iṣudhimate taskarāṇāṁ pataye namo namo vañcate parivañcate stāyūnāṁ pataye namo namo nicerave paricarāyāraṇyānāṁ pataye namo namaḥ sṛkāvibhyo jighāṁsadbhyo muṣṇatāṁ pataye namo namo'simadbhyo naktaṁcaradbhyaḥ prakṛntānāṁ pataye namo nama uṣṇīṣine giricarāya kuluñcānāṁ pataye namo nama iṣumadbhyo dhanvāvibhyaśca vo namo nama ātanvānebhya pratidadhānebhyaśca vo namo nama āyacchadbhyo visṛjadbhyaśca vo namo namo'syadbhyo vidhyadbhyaśca vo namo nama āsīnebhyaḥ śayānebhyaśca vo namo namaḥ svapadbhyo jāgradbhyaśca vo namo namastiṣṭhadbhyo dhāvadbhyaśca vo namo namaḥ sabhābhyaḥ sabhāpatibhyaśca vo namo namo aśvebhyo'śvapatibhyaśca vo namaḥ ||3||**

# अनुवाक - ४

## Anuvāka - 4

नम॑ आव्य॒धिनी॑भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒ नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नमो॒ नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नमो॒ नमो॒ व्राते॑भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒ नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒ नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒ नमो॑ म॒हद्भ्यः॑ क्षुल्ल॒केभ्य॑श्च वो॒ नमो॒ नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒ नमो॒ रथे॑भ्यो॒ रथ॑पतिभ्यश्च वो॒ नमो॒ नम॒: सेना॑भ्यः सेन॒निभ्य॑श्च वो॒ नमो॒ नम॑: क्ष॒त्तृभ्य॑: संग्रही॒तृभ्य॑श्च वो॒ नमो॒ नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒ नम॒: कुला॑लेभ्यः क॒र्मारे॑भ्यश्च वो॒ नमो॒ नम॑: पु॒ञ्जिष्टे॑भ्यो निषा॒देभ्य॑श्च वो॒ नमो॒ नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नमो॒ नमो॑ मृग॒युभ्य॑: श्व॒निभ्य॑श्च वो॒ नमो॒ नम॒: श्वभ्य॒: श्वप॑तिभ्यश्च वो॒ नम॑: ॥४॥

nama̍ āvya̱dhinī̎bhyo vi̱vidhya̍ntībhyaśca vo̱ namo̱ nama̱ uga̍ṇābhyastṛꣳha̱tībhya̍śca vo̱ namo̱ namo̍ gṛ̱tsebhyo̍ gṛ̱tsapa̍tibhyaśca vo̱ namo̱ namo̱ vrāte̎bhyo̱ vrāta̍patibhyaśca vo̱ namo̱ namo̍ ga̱ṇebhyo̍ ga̱ṇapa̍tibhyaśca vo̱ namo̱ namo̱ virū̍pebhyo vi̱śvarū̍pebhyaśca vo̱ namo̱ namo̍ ma̱hadbhya̍ḥ kṣulla̱kebhya̍śca vo̱ namo̱ namo̍ ra̱thibhyo̍'ra̱thebhya̍śca vo̱ namo̱ namo̱ rathe̎bhyo̱ ratha̍patibhyaśca vo̱ namo̱ nama̱ḥ senā̎bhyaḥ sena̱nibhya̍śca vo̱ namo̱ nama̍ḥ kṣa̱ttṛbhya̍ḥ saṁgrahī̱tṛbhya̍śca vo̱ namo̱ nama̱stakṣa̍bhyo rathakā̱rebhya̍śca vo̱ namo̱ nama̱ḥ kulā̍lebhyaḥ ka̱rmāre̎bhyaśca vo̱ namo̱ nama̍ḥ pu̱ñjiṣṭe̎bhyo niṣā̱debhya̍śca vo̱ namo̱ nama̍ iṣu̱kṛdbhyo̍ dhanva̱kṛdbhya̍śca vo̱ namo̱ namo̍ mṛga̱yubhya̍ḥ śva̱nibhya̍śca vo̱ namo̱ nama̱ḥ śvabhya̱ḥ śvapa̍tibhyaśca vo̱ nama̍ḥ ||4||

# अनुवाक - ५

**Anuvāka - 5**

नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒ नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च॒ नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒ नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒ नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒ नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒ नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒ नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒ नमो॑ वृ॒द्धाय॑ च सं॒वृद्व॑ने च॒ नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒ नम॑ आ॒शवे॑ चाजि॒राय॑ च॒ नमः॒ शीघ्रि॑याय च॒ शीभ्या॑य च॒ नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒ नमः॑ स्रोत॒स्या॑य च॒ द्वीप्या॑य च॥५॥

**namo̍ bha̱vāya̍ ca ru̱drāya̍ ca̱ nama̍ḥ śa̱rvāya̍ ca paśu̱pata̍ye ca̱ namo̱ nīla̍grīvāya ca śiti̱kaṇṭhā̍ya ca̱ nama̍ḥ kapa̱rdine̍ ca̱ vyu̍ptakeśāya ca̱ nama̍ḥ sahasrā̱kṣāya̍ ca śa̱tadha̍nvane ca̱ namo̍ giri̱śāya̍ ca śipivi̱ṣṭāya̍ ca̱ namo̍ mī̱ḍhuṣṭa̍māya̱ ceṣu̍mate ca̱ namo̎ hra̱svāya̍ ca vāma̱nāya̍ ca̱ namo̍ bṛha̱te ca̱ varṣī̍yase ca̱ namo̍ vṛ̱ddhāya̍ ca saṁ̱vṛdva̍ne ca̱ namo̱ agri̍yāya ca pratha̱māya̍ ca̱ nama̍ ā̱śave̍ cāji̱rāya̍ ca̱ nama̱ḥ śīghri̍yāya ca̱ śībhyā̍ya ca̱ nama̍ ū̱rmyā̍ya cāvasva̱nyā̍ya ca̱ nama̍ḥ srota̱syā̍ya ca̱ dvīpyā̍ya ca ||5||**

# अनुवाक - ६

## Anuvāka - 6

नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नम॑: पूर्व॒जाय॑ चापर॒जाय॑ च॒ नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॑य च॒ बुध्नि॑याय च॒ नम॑: सो॒भ्या॑य च प्रतिस॒र्या॑य च॒ नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒ नम॑ उर्व॒र्या॑य च॒ खल्या॑य च॒ नम॒: श्लोक्या॑य चाऽवसा॒न्या॑य च॒ नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒ नम॑: श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒ नम॑ आ॒शुषे॑णाय चा॒शुर॑थाय च॒ नम॒: शूरा॑य चावभिन्द॒ते च॒ नमो॑ व॒र्मिणे॑ च वरू॒थिने॑ च॒ नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒ नम॑: श्रु॒ताय॑ च श्रुतसे॒नाय॑ च॥ ६॥

**namo̍ jye̱ṣṭhāya̍ ca kani̱ṣṭhāya̍ ca̱ nama̍ḥ pūrva̱jāya̍ cāpara̱jāya̍ ca̱ namo̍ madhya̱māya̍ cāpaga̱lbhāya̍ ca̱ namo̍ jagha̱nyā̍ya ca̱ budhni̍yāya ca̱ nama̍ḥ so̱bhyā̍ya ca pratisa̱ryā̍ya ca̱ namo̱ yāmyā̍ya ca̱ kṣemyā̍ya ca̱ nama̍ urva̱ryā̍ya ca̱ khalyā̍ya ca̱ nama̱ḥ ślokyā̍ya cā'vasā̱nyā̍ya ca̱ namo̱ vanyā̍ya ca̱ kakṣyā̍ya ca̱ nama̍ḥ śra̱vāya̍ ca pratiśra̱vāya̍ ca̱ nama̍ ā̱śuṣe̍ṇāya cā̱śura̍thāya ca̱ nama̱ḥ śūrā̍ya cāvabhinda̱te ca̱ namo̍ va̱rmiṇe̍ ca varū̱thine̍ ca̱ namo̍ bi̱lmine̍ ca kava̱cine̍ ca̱ nama̍ḥ śru̱tāya̍ ca śrutase̱nāya̍ ca || 6||**

# अनुवाक - ७

## Anuvāka - 7

नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒ नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒ नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च॒ नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒ नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒ नम॑: स्वायु॒धाय॑ च सु॒धन्व॑ने च॒ नम॒: स्रुत्या॑य च॒ पथ्या॑य च॒ नम॑: का॒ट्या॑य च नी॒प्या॑य च॒ नम॒: सूद्या॑य च सर॒स्या॑य च॒ नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒ नम॒: कूप्या॑य चाव॒ट्या॑य च॒ नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒ नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒ नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒ नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒ नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑ च॥ ७॥

**namo dundu̱bhyāya cāhana̱nyāya ca̱ namo dhṛṣṇave ca pramṛ̱śāya ca̱ namo dū̱tāya ca̱ prahitāya ca̱ namo niṣa̱ṅgiṇe ceṣudhi̱mate ca̱ namastī̱kṣṇeṣave cāyu̱dhine ca̱ namaḥ svāyu̱dhāya ca su̱dhanvane ca̱ nama̱ḥ srutyāya ca̱ pathyāya ca̱ namaḥ kā̱ṭyāya ca nī̱pyāya ca̱ nama̱ḥ sūdyāya ca sara̱syāya ca̱ namo nā̱dyāya ca vaiśa̱ntāya ca̱ nama̱ḥ kūpyāya cāva̱ṭyāya ca̱ namo̱ varṣyāya cāva̱rṣyāya ca̱ namo me̱ghyāya ca vidyu̱tyāya ca̱ nama ī̱dhriyāya cāta̱pyāya ca̱ namo̱ vātyāya ca̱ reṣmiyāya ca̱ namo vāsta̱vyāya ca vāstu̱pāya ca ।। 7।।**

# अनुवाक - ८

## Anuvāka - 8

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च॥ ८॥

**namaḥ somāya ca rudrāya ca namastāmrāya cāruṇāya ca namaḥ śaṅgāya ca paśupataye ca nama ugrāya ca bhīmāya ca namo agrevadhāya ca dūrevadhāya ca namo hantre ca hanīyase ca namo vṛkṣebhyo harikeśebhyo namastārāya namaśśaṁbhave ca mayobhave ca namaḥ śaṁkarāya ca mayaskarāya ca namaḥ śivāya ca śivatarāya ca namastīrthyāya ca kūlyāya ca namaḥ pāryāya cāvāryāya ca namaḥ prataraṇāya cottaraṇāya ca nama ātāryāya cālādyāya ca namaḥ śaṣpyāya ca phenyāya ca namaḥ sikatyāya ca pravāhyāya ca ||8||**

# अनुवाक - ९

## Anuvāka - 9

नम॑ इरि॒ण्या॑य च प्रप॒थ्या॑य च॒ नमः॑ किꣳशि॒लाय॑ च॒ क्षय॑णाय च॒ नमः॑ कप॒र्दिने॑ च पुल॒स्तये॑ च॒ नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒ नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ नमः॑ का॒ट्या॑य च गह्व॒रेष्ठाय॑ च॒ नमो॑ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒ नमः॑ पाꣳस॒व्या॑य च रज॒स्या॑य च॒ नम॒: शुष्क्या॑य च हरि॒त्या॑य च॒ नमो॒ लोप्या॑य चोल॒प्या॑य च॒ नम॑ ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒ नमः॑ प॒र्ण्या॑य च पर्णश॒द्या॑य च॒ नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒ नम॑ आखिद॒ते च॑ प्रखिद॒ते च॒ नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विक्षीण॒केभ्यो॒ नमो॑ विचिन्व॒त्केभ्यो॒ नम॑ आनिर्ह॒तेभ्यो॒ नम॑ आमीव॒त्केभ्यः॑॥ ९॥

**nama iriṇyāya ca prapathyāya ca namaḥ kiṁśilāya ca kṣayaṇāya ca namaḥ kapardine ca pulastaye ca namo goṣṭhyāya ca gṛhyāya ca namastalpyāya ca gehyāya ca namaḥ kāṭyāya ca gahvareṣṭhāya ca namo hradayyāya ca niveṣpyāya ca namaḥ pāṁsavyāya ca rajasyāya ca namaḥ śuṣkyāya ca harityāya ca namo lopyāya colapyāya ca nama ūrvyāya ca sūrmyāya ca namaḥ parṇyāya ca parṇaśadyāya ca namo'paguramāṇāya cābhighnate ca nama ākhkhidate ca prakhkhidate ca namo vaḥ kirikebhyo devānāṁ hṛdayebhyo namo vikṣīṇakebhyo namo vicinvatkebhyo nama ānirhatebhyo nama āmīvatkebhyaḥ | | 9| |**

# अनुवाक - १०

**Anuvāka - 10**

द्रापे अन्धसस्पते दरिद्रन्नीललोहित। एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत्॥ १०-१॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी। शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥ १०-२॥

इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्॥ यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥ १०-३॥

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥ १०-४॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ १०-५॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते॥ १०-६॥

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु। रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः॥ १०-७॥

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्। मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः॥ १०-८॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥ १०-९॥

मीढुष्टम शिवतम शिवो नः सुमना भव। परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं

बिभ्रदागहि॥ १०-१०॥

विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्रꣳ हेतयोन्यमस्मन्निवपन्तु ताः॥ १०-११॥

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि॥ १०-१२॥

drāpe andhasaspate daridrannīlalohita | eṣāṁ puruṣāṇāmeṣāṁ paśūnāṁ mā bhermā'ro mo eṣāṁ kiṁcanāmamat || 10-1||

yā te rudra śivā tanūḥ śivā viśvāha bheṣajī | śivā rudrasya bheṣajī tayā no mṛḍa jīvase || 10-2||

imāṁ rudrāya tavase kapardine kṣayadvīrāya prabharāmahe matim|| yathā naḥ śamasaddvipade catuṣpade viśvaṁ puṣṭaṁ grāme asminnanāturam || 10-3||

mṛḍā no rudrota no mayaskṛdhi kṣayadvīrāya namasā vidhema te | yacchaṁ ca yośca manurāyaje pitā tadaśyāma tava rudra praṇītau || 10-4||

mā no mahāntamuta mā no arbhakaṁ mā na ukṣantamuta mā na ukṣitam | mā no'vadhīḥ pitaraṁ mota mātaraṁ priyā mā nastanuvo rudra rīriṣaḥ || 10-5||

mānastoke tanaye mā na āyuṣi mā no goṣu mā no aśveṣu rīriṣaḥ | vīrānmā no rudra bhāmito'vadhī-rhaviṣmanto namasā vidhema te || 10-6||

ārātte goghna uta pūruṣaghne kṣayadvīrāya sumnamasme te astu | rakṣā ca no adhi ca deva brūhyadhā ca naḥ śarma yaccha dvibarhāḥ || 10-7||

stuhi śrutaṁ gartasadaṁ yuvānaṁ mṛganna bhīmamupahatnumugram | mṛḍā jaritre rudra stavāno anyante asmannivapantu senāḥ || 10-8||

pariṇo rudrasya hetirvṛṇaktu pari tveṣasya durmatiraghāyoḥ | ava sthirā maghavadbhyastanuṣva mīḍhvastokāya tanayāya mṛuḍaya || 10-9||

mīḍhuṣṭama śivatama śivo naḥ sumanā bhava | parame vṛkṣa āyudhannidhāya kṛttiṁ vasāna ācara pinākaṁ bibhradāgahi || 10-10||

vikirida vilohita namaste astu bhagavaḥ | yāste sahasraṁ hetayonyamasmannivapantu tāḥ || 10-11||

sahasrāṇi sahasradhā bāhuvostava hetayaḥ | tāsāmīśāno bhagavaḥ parācīnā mukhā kṛdhi || 10-12||

# अनुवाक - ११

## Anuvāka - 11

स॒हस्रा॑णि सहस्र॒शो ये रु॒द्रा अधि॒ भूम्या॒॑म्। तेषा॑ꣳ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ ११-१॥

अ॒स्मिन् म॑ह॒त्य॑र्ण॒वे॒॑ऽन्तरि॑क्षे भ॒वा अधि॑॥ ११-२॥

नील॑ग्रीवाः शिति॒कण्ठा॒॑ः श॒र्वा अ॒धः क्ष॑माच॒राः॥ ११-३॥

नील॑ग्रीवाः शिति॒कण्ठा॒ दिव॑ꣳ रु॒द्रा उप॑श्रिताः॥ ११-४॥

ये वृ॒क्षेषु॑ स॒स्पिञ्ज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः॥ ११-५॥

ये भू॒ताना॒मधि॑पतयो विशि॒खास॑ः कप॒र्दिन॑ः॥ ११-६॥

ये अन्ने॑षु वि॒विध्य॑न्ति॒ पात्रे॑षु॒ पिब॑तो॒ जना॑न्॥ ११-७॥

ये प॒थां प॑थि॒रक्ष॑य ऐलबृ॒दा य॒व्युध॑ः॥ ११-८॥

ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒काव॑न्तो निष॒ङ्गिण॑ः॥ ११-९॥

य ए॒ताव॑न्तश्च भूया॑ꣳसश्च दिशो॑ रु॒द्रा वि॑तस्थि॒रे तेषा॑ꣳ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि॥ ११-

१०॥

नमो॑ रु॒द्रेभ्यो॒ ये पृ॑थि॒व्यां ये॒॑ऽन्तरि॑क्षे ये दि॒वि येषा॒मन्नं॒ वातो॑ व॒र्॒षमिष॑व॒स्तेभ्यो॒ दश॒ प्राची॒र्दश॑ द॒क्षिणा

दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वास्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑

दधामि॥ ११-११॥

**sa̲hasrā̍ṇi sahasra̲śo ye ru̲drā adhi̲ bhūmyā̎m । teṣā̍m̐ sahasrayoja̲ne'va̲dhanvā̍ni tanmasi ।। 11-1।।**

**a̲smin ma̍ha̲tya̍rṇa̲ve̎'ntari̍kṣe bha̲vā adhi̍ ।। 11-2।।**

**nīla̍grīvāḥ śiti̲kaṇṭhā̎ḥ śa̲rvā a̲dhaḥ kṣa̍māca̲rāḥ ।। 11-3।।**

**nīla̍grīvāḥ śiti̲kaṇṭhā̲ diva̍m̐ ru̲drā upa̍śritāḥ ।। 11-4।।**

**ye vṛ̲kṣeṣu̍ sa̲spiñja̍rā̲ nīla̍grīvā̲ vilo̍hitāḥ ।। 11-5।।**

ye bhū̱tānā̱madhi̍patayo viśi̱khāsa̍ḥ kapa̱rdina̍ḥ || 11-6||

ye anne̍ṣu vi̱vidhya̍nti̱ pātre̍ṣu̱ piba̍to̱ jana̱̍n || 11-7||

ye pa̱thāṁ pa̍thi̱rakṣa̍ya ailabṛ̱dā ya̱vyudha̍ḥ || 11-8||

ye tī̱rthāni̍ pra̱cara̍nti sṛ̱kāva̍nto niṣa̱ṅgiṇa̍ḥ || 11-9||

ya e̱tāva̍ntaśca̱ bhūyāgͫ̍saśca̱ diśo̍ ru̱drā vi̍tasthi̱re teṣāgͫ̍ sahasrayoja̱ne'va̱dhanvā̍ni tanmasi || 11-10||

namo̍ ru̱drebhyo̱ ye pṛ̍thi̱vyāṁ ye̍'ntari̍kṣe̱ ye di̱vi yeṣā̱manna̱ṁ vāto̍ va̱rṣami̍ṣava̱stebhyo̱ daśa̱ prācī̱rdaśa̍ dakṣi̱ṇā daśa̍ pra̱tīcī̱rdaśodī̍cī̱rdaśo̱rdhvāstebhyo̱ nama̱ste no̍ mṛḍayantu̱ te yaṁ dvi̱ṣmo yaśca̍ no̱ dveṣṭi̱ taṁ vo̱ jambhe̍ dadhāmi || 11-11||

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥ १॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु॥ २॥

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य। यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य॥ ३॥

अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयꣳ शिवाभिमर्शनः॥ ४॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान् यज्ञस्य मायया सर्वानव यजामहे। मृत्यवे स्वाहा मृत्यवे स्वाहा॥ ५॥

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि। प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाप्यायस्व॥ ६॥ सदाशिवोम्॥

tryambakaṁ yajāmahe sugandhiṁ puṣṭivardhanam । urvārukamiva bandhanānmṛtyormukṣīya mā'mṛtāt ।। 1।।

yo rudro agnau yo apsu ya oṣadhīṣu yo rudro viśvā bhuvanā''viveśa tasmai rudrāya namo astu ।। 2।।

tamuṣṭuhi yaḥ sviṣuḥ sudhanvā yo viśvasya kṣayati bheṣajasya । yakṣvāmahe saumanasāya rudraṁ namobhirdevamasuraṁ duvasya ।। 3।।

ayaṁ me hasto bhagavānayaṁ me bhagavattaraḥ । ayaṁ me viśvabheṣajo'yaṁ̐ śivābhimarśanaḥ ।। 4।।

ye te sahasramayutaṁ pāśā mṛtyo martyāya hantave । tān yajñasya māyayā sarvānava yajāmahe । mṛtyave svāhā mṛtyave svāhā ।। 5।।

oṁ namo bhagavate rudrāya viṣṇave mṛtyurme pāhi । prāṇānāṁ granthirasi rudro mā viśāntakaḥ । tenānnenāpyāyasva ।। 6।। sadāśivom ।।

ओं शान्तिः शान्तिः शान्तिः॥

oṁ śāntiḥ śāntiḥ śāntiḥ ।।

## ॥ चमकप्रश्नः ॥

।। camakapraśnaḥ ।।

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम्॥
agnāviṣṇū sajoṣasemā vardhantu vāṁ giraḥ । dyumnairvājebhirāgatam ।।

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे॥ १॥

vājaśca me prasavaśca me prayatiśca me prasitiśca me dhītiśca me kratuśca me svaraśca me ślokaśca me śrāvaśca me śrutiśca me jyotiśca me suvaśca me prāṇaśca me'pānaśca me vyānaśca me'suśca me cittaṁ ca ma ādhītaṁ ca me vāk ca me manaśca me cakṣuśca me śrotraṁ ca me dakṣaśca me balaṁ ca ma ojaśca me sahaśca ma āyuśca me jarā ca ma ātmā ca me tanūśca me śarma ca me varma ca me'ṅgāni ca me'sthāni ca me parūm̐ṣi ca me śarīrāṇi ca me ।। 1।।

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे

क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे॥ २॥

jyaiṣṭhyaṁ ca ma ādhipatyaṁ ca me manyuśca me bhāmaśca me'maśca me'mbhaśca me jemā ca me mahimā ca me varimā ca me prathimā ca me varṣmā ca me drāghuyā ca me vṛddhaṁ ca me vṛddhiśca me satyaṁ ca me śraddhā ca me jagacca me dhanaṁ ca me vaśaśca me tviṣiśca me krīḍā ca me modaśca me jātaṁ ca me janiṣyamāṇaṁ ca me sūktaṁ ca me sukṛtaṁ ca me vittaṁ ca me vedyaṁ ca me bhūtaṁ ca me bhaviṣyacca me sugaṁ ca me supathaṁ ca ma ṛddhaṁ ca ma ṛddhiśca me kḷptaṁ ca me kḷptiśca me matiśca me sumatiśca me || 2||

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥ ३॥

śaṁ ca me mayaśca me priyaṁ ca me'nukāmaśca me kāmaśca me saumanasaśca me bhadraṁ ca me śreyaśca me vasyaśca me yaśaśca me bhagaśca me draviṇaṁ ca me yantā ca me dhartā ca me kṣemaśca me dhṛtiśca me viśvaṁ ca me mahaśca me saṁvicca me jñātraṁ ca me sūśca me prasūśca me sīraṁ ca me layaśca ma ṛtaṁ ca me'mṛtaṁ ca me'yakṣmaṁ ca me'nāmayacca me jīvātuśca me dīrghāyutvaṁ ca me'namitraṁ ca me'bhayaṁ ca me sugaṁ ca me śayanaṁ ca me sūṣā ca me sudinaṁ ca me || 3||

ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहियश्च मे यवाँश्च मे

माषाँश्च मे तिलाँश्च मे मुद्गाश्च मे खल्वाँश्च मे गोधूमाँश्च मे मसुराँश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामकाँश्च मे नीवाराँश्च मे॥ ४॥

ūrk ca me sūnṛtā ca me payaśca me rasaśca me ghṛtaṁ ca me madhu ca me sagdhiśca me sapītiśca me kṛṣiśca me vṛṣṭiśca me jaitraṁ ca ma audbhidyaṁ ca me rayiśca me rāyaśca me puṣṭaṁ ca me puṣṭiśca me vibhu ca me prabhu ca me bahu ca me bhūyaśca me pūrṇaṁ ca me pūrṇataraṁ ca me'kṣitiśca me kūyavāśca me'nnaṁ ca me'kṣucca me vrīhiyaśca me yavāśca me māṣāśca me tilāśca me mudgāśca me khalvāśca me godhūmāśca me masurāśca me priyaṁgavaśca me'ṇavaśca me śyāmakāśca me nīvārāśca me ।। 4।।

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे॥ ५॥

aśmā ca me mṛttikā ca me girayaśca me parvatāśca me sikatāśca me vanaspatayaśca me hiraṇyaṁ ca me'yaśca me sīsaṁ ca me trapuśca me śyāmaṁ ca me lohaṁ ca me'gniśca ma āpaśca me vīrudhaśca ma oṣadhayaśca me kṛṣṭapacyaṁ ca me'kṛṣṭapacyaṁ ca me grāmyāśca me paśava āraṇyāśca yajñena kalpantāṁ vittaṁ ca me vittiśca me bhūtaṁ ca me bhūtiśca me vasu ca me vasatiśca me karma ca me śaktiśca me'rthaśca ma emaśca ma itiśca me gatiśca me ।। 5।।

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे

देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे॥ ६॥

**agniśca ma indraśca me somaśca ma indraśca me savitā ca ma indraśca me sarasvatī ca ma indraśca me pūṣā ca ma indraśca me bṛhaspatiśca ma indraśca me mitraśca ma indraśca me varuṇaśca ma indraśca me tvaṣṭā ca ma indraśca me dhātā ca ma indraśca me viṣṇuśca ma indraśca me'śvinau ca ma indraśca me marutaśca ma indraśca me viśve ca me devā indraśca me pṛthivī ca ma indraśca me'ntarikṣaṁ ca ma indraśca me dyauśca ma indraśca me diśaśca ma indraśca me mūrdhā ca ma indraśca me prajāpatiśca ma indraśca me | | 6 | |**

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याँश्च म ऐन्द्राग्नश्च मे वैश्वदेवाश्च मे मरुत्वतीयाँश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे॥ ७॥

**aṁśuśca me raśmiśca me'dābhyaśca me'dhipatiśca ma upāṁśuśca me'ntaryāmaśca ma aindravāyaśca me maitrāvaruṇaśca ma āśvinaśca me pratiprasthānaśca me śukraśca me manthī ca ma āgrayaṇaśca me vaiśvadevaśca me dhruvaśca me vaiśvānaraśca ma ṛtugrahāśca me'tigrāhyāśca ma aindrāgnaśca me vaiśvadevāśca me marutvatīyāśca me māhendraśca ma ādityaśca me sāvitraśca me sārasvataśca me pauṣṇaśca me pātnīvataśca me hāriyojanaśca me | | 7 | |**

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म

आग्नींध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाँश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे॥ ८॥

idhmaśca me barhiśca me vediśca me dhiṣṇiyāśca me srucaśca me camasāśca me grāvāṇaśca me svaravaśca ma uparavāśca me'dhiṣavaṇe ca me droṇakalaśaśca me vāyavyāni ca me pūtabhṛcca ma ādhavanīyaśca ma āgnīdhraṁ ca me havirdhānaṁ ca me gṛhāśca me sadaśca me puroḍāśāśca me pacatāśca me'vabhṛthaśca me svagākāraśca me || 8||

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक् च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम्॥ ९॥

agniśca me gharmaśca me'rkaśca me sūryaśca me prāṇaśca me'śvamedhaśca me pṛthivī ca me'ditiśca me ditiśca me dyauśca me śakkvarīraṅgulayo diśaśca me yajñena kalpantāmṛk ca me sāma ca me stomaśca me yajuśca me dīkṣā ca me tapaśca ma ṛtuśca me vratam ca me'horātrayorvṛṣṭyā bṛhadrathantare ca me yajñena kalpetām || 9||

गर्भाँश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥ १०॥

garbhā̍śca me va̱tsāśca̍ me̱ tryavi̍śca me trya̱vī ca̍ me dityavā̱ṭ ca̍ me dityau̱hī ca̍ me̱

pañcā̍viśca me pañcā̱vī ca̍ me triva̱tsaśca̍ me triva̱tsā ca̍ me turya̱vāṭ ca̍ me turyau̱hī ca̍ me

paṣṭha̱vāṭ ca̍ me paṣṭhau̱hī ca̍ ma u̱kṣā ca̍ me va̱śā ca̍ ma ṛṣa̱bhaśca̍ me ve̱hacca̍

me'na̱ḍvāñca̍ me dhe̱nuśca̍ ma̱ āyu̍rya̱jñena̍ kalpatāṁ prā̱ṇo ya̱jñena̍ kalpatāmapā̱no

ya̱jñena̍ kalpatāṁ vyā̱no ya̱jñena̍ kalpatā̱ṁ cakṣu̍rya̱jñena̍ kalpatā̱m̐ śrotra̍ṁ ya̱jñena̍

kalpatā̱ṁ mano̍ ya̱jñena̍ kalpatā̱ṁ vāgya̱jñena̍ kalpatāmā̱tmā ya̱jñena̍ kalpatāṁ ya̱jño

ya̱jñena̍ kalpatām || 10 ||

एका॑ च मे ति॒स्रश्च॑ मे॒ पञ्च॑ च मे स॒प्त च॑ मे॒ नव॑ च म॒ एका॑दश च मे॒ त्रयो॑दश च मे॒ पञ्च॑दश च मे

स॒प्तद॑श च मे॒ नव॑दश च म॒ एक॑विꣳशतिश्च मे॒ त्रयो॑विꣳशतिश्च मे॒ पञ्च॑विꣳशतिश्च मे

स॒प्तवि॑ꣳशतिश्च मे॒ नव॑विꣳशतिश्च म॒ एक॑त्रिꣳशच्च मे॒ त्रय॑स्त्रिꣳशच्च मे॒ चत॑स्रश्च मे॒ऽष्टौ च॑

मे॒ द्वाद॑श च मे॒ षोड॑श च मे विꣳश॒तिश्च॑ मे॒ चतु॑र्विꣳशतिश्च मे॒ऽष्टावि॑ꣳशतिश्च मे॒ द्वात्रि॑ꣳशच्च मे॒

षट्त्रि॑ꣳशच्च मे चत्वरि॒ꣳशच्च॑ मे॒ चतु॑श्चत्वारिꣳशच्च मे॒ऽष्टाच॑त्वारिꣳशच्च मे॒ वाज॑श्च

प्र॒स॒वश्चा॑पि॒जश्च॒ क्रतु॑श्च॒ सुव॑श्च मू॒र्धा च॒ व्य॒श्नि॑यश्चान्त्याय॒नश्चान्त्य॑श्च भौव॒नश्च॒

भुव॑न॒श्चाधि॑पतिश्च॥ ११॥

ekā̍ ca me ti̱sraśca̍ me̱ pañca̍ ca me sa̱pta ca̍ me̱ nava̍ ca ma̱ ekā̍daśa ca me̱ trayo̍daśa ca me̱

pañca̍daśa ca me sa̱ptada̍śa ca me̱ nava̍daśa ca ma̱ eka̍vim̐śatiśca me̱ trayo̍vim̐śatiśca me̱

pañca̍vim̐śatiśca me sa̱ptavi̍m̐śatiśca me̱ nava̍vim̐śatiśca ma̱ eka̍trim̐śacca me̱

traya̍strim̐śacca me̱ cata̍sraśca me̱'ṣṭau ca̍ me̱ dvāda̍śa ca me̱ ṣoḍa̍śa ca me vim̐śa̱tiśca̍ me̱

catu̍rvim̐śatiśca me̱'ṣṭāvi̍m̐śatiśca me̱ dvātri̍m̐śacca me̱ ṣaṭtri̍m̐śacca me catvari̱m̐śacca̍ me̱

catu̍ścatvārim̐śacca me̱'ṣṭāca̍tvārim̐śacca me̱ vāja̍śca prasa̱vaścā̍pijaśca̱ kratu̍śca̱ suva̍śca

mū̱rdhā ca̱ vyaśni̍yaścāntyāya̱naścāntya̍śca bhauva̱naśca̱ bhuva̍na̱ścādhi̍patiśca || 11||

ॐ इडा॑ देव॒हूर्मनु॑र्यज्ञनीर्बृह॒स्पति॑रुक्थाम॒दानि॑ शꣳसिषद्विश्वे॑दे॒वाः सू॑क्तवा॒चः पृथि॑वीमात॒र्मा मा॑

हिꣳसीर्मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒ मधु॑ वक्ष्यामि॒ मधु॑ वदिष्यामि॒ मधु॑मतीं दे॒वेभ्यो॒ वाच॑मुद्यासꣳ

शु॒श्रू॒षेण्याँ॑ मनु॒ष्ये॑भ्य॒स्तं मा॑ दे॒वा अ॑वन्तु शो॒भायै॑ पि॒तरोऽनु॑मदन्तु॥

**om iḍā̍ deva̱hūrmanu̍ryajña̱nīrbṛha̱spati̍rukthāma̱dāni̍ śaṁ̐siṣa̱dviśve̍de̱vāḥ sū̎kta̱vāca̱ḥ pṛthi̍vīmāta̱rmā mā̍ hiṁ̐sī̱rmadhu̍ maniṣye̱ madhu̍ janiṣye̱ madhu̱ vakṣyāmi̱ madhu̍ vadiṣyāmi̱ madhu̍matīṁ de̱vebhyo̱ vāca̍mudyāsaṁ̐ śuśrū̱ṣeṇyā̎ṁ manu̱ṣye̎bhya̱staṁ mā̍ de̱vā a̍vantu śo̱bhāyai̍ pi̱taro'nu̍madantu ||**

॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

**|| om śānti̱ḥ śānti̱ḥ śānti̍ḥ ||**

॥ इति श्री कृष्णयजुर्वेदीय तैत्तिरीय संहितायां चतुर्थकाण्डे सप्तमः प्रपाठकः॥

**|| iti śrī kṛṣṇayajurvedīya taittirīya saṁhitāyāṁ caturthakāṇḍe saptamaḥ prapāṭhakaḥ ||**

ॐ नमः शंभवेच अग्निहोत्रात्मने हृन्दयाय नमः ।

om namaḥ śambhaveca agnihotrātmane hŕdayāya namaḥ |

मयोभवेच दर्शपोर्ण मासात्मने शिरसे स्वाहा ।

mayobhaveca darśapoorṇa māsātmane śirase svāhā |

नमः शम्करायच चातुर्मास्यात्मने शिखायै वशट् ।

namaḥ śamkarāyaca cāturmāsyātmane śikhāyai vaśaṭ |

मयस्करायच निरूढ पशु बन्धात्मने कवचाय हुम् ।

mayaskarāyaca nirūḍha paśu bandhātmane kavacāya hum |

नमः शिवायच ज्योतिश्टोमात्मने नेत्रत्रयाय वोषट् ।

namaḥ śivāyaca jyotiśṭomātmane netratrayāya vouṣaṭ |

शिवतरायच सर्व क्रत्वात्मने  अस्त्राय फट् ॥

śivatarāyaca sarva kratvātmane  astrāya phaṭ ||

भोर्भुवस्सुवरोमिति दिग्विमोकः ॥

bhoorbhuvassuvaromiti digvimokaḥ ||

ध्यानं

शुध्ध स्फटिक संकाशं शुध्धविद्या प्रदायकं ।

शुध्धं पूर्णम् चिदानन्दं सदाशिव महं भजे ॥

dhyānaṁ
śudhdha sphaṭika saṅkāśaṁ śudhdhavidyā pradāyakaṁ |
śudhdhaṁ pūrṇam cidānandaṁ sadāśiva mahaṁ bhaje ||

ॐ शांतिः शांतिः शांतिः

om śāntiḥ śāntiḥ śāntiḥ

श्रीसायीश्वराय नमः । हरिः ॐ ॥

śrīsāyīśvarāya namaḥ | hariḥ om ||

ॐ ॥ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः ।
स नः पर्-षदति दुर्गाणि विश्वा नावेव सिम्धुं दुरितात्यग्निः ॥

om || jātavedase sunavāma soma marātīyato nidahāti vedaḥ |
sa naḥ par-ṣadati durgāṇi viśvā nāveva simdhuṁ duritātyagniḥ ||

तामग्निवर्णां तपसा ज्वलम्तीं वैरोचनीं कर्मफलेषु जुष्टां ।
दुर्गां देवीग्ं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

tāmagnivarṇāṁ tapasā jvalamtīṁ vairocanīṁ karmaphaleṣu juṣṭāṁ |
durgāṁ devīgṁ śaraṇamahaṁ prapadye sutarasi tarase namaḥ ||

अग्ने त्वं पारया नव्यो अस्मांठ्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च प्ृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥

agne tvaṁ pārayā navyo asmānṭhsvastibhirati durgāṇi viśvā |
pūśca pr̥thvī bahulā na urvī bhavā tokāya tanayāya śaṁyoḥ ||

विश्वानि नो दुर्गहा जातवेदः सिंधुन्न नावा दुरिता-तिपर्षि ।
अग्ने अत्रिवन्मनसा गृ्णानो-स्माकं बोध्यविता तनूनां ॥

viśvāni no durgahā jātavedaḥ sindhunna nāvā duritā-tiparṣi |
agne atrivanmanasā gr̥ṇāno-smākaṁ bodhyavitā tanūnāṁ ||

प्ृतना जितग्ं सहमा-नमुग्रमग्निग्ं हुवेम परमाथ्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्व क्शामद्देवो अति दुरिता-त्यग्निः ॥

pr̥tanā jitagṁ sahamā-namugramagnigṁ huvema paramāthsadhasthāt|
sa naḥ parṣadati durgāṇi viśva kśāmaddevo ati duritā-tyagniḥ ||

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वाम्चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥

pratnoṣi kamīḍyo adhvareṣu sanācca hotā navyaśca satsi ।
svāmcāgne tanuvaṁ piprayasvāsmabhyaṁ ca saubhagamāyajasva ॥

गोभिर्जुष्टमयुजो निषिक्तं तवेंद्र विष्णो-रनुस्ंचरेम ।
नाकस्य प्ृष्ठमभि संवसानो वैष्णवीं लोक इह मादयंतां ॥

gobhirjuṣṭamayujo niṣiktaṁ tavendra viṣṇo-ranusñcarema ।
nākasya pr̥ṣṭhamabhi saṁvasāno vaiṣṇavīṁ loka iha mādayantāṁ ॥

ॐ कातायनाय विद्महे कन्यकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥

om kātāyanāya vidmahe kanyakumāri dhīmahi ।
tanno durgiḥ pracodayāt ॥

ॐ शाम्तिः शाम्तिः शाम्तिः

om śāmtiḥ śāmtiḥ śāmtiḥ

ॐ श्रीसायीश्वराय नमः। हरिः ॐ

om śrīsāyīśvarāya namaḥ । hariḥ om

ॐ तच्चं योरावृ॒णीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं। शं नो अस्तु द्विपदे। शम् चतुषपदे॥

om taccaṁ yorāvr̆ṇīmahe । gātuṁ yajñāya । gātuṁ yajñapataye । daivī svastirastu naḥ । svastir-mānuṣebhyaḥ। ūrdhvaṁ jigātu bheṣajaṁ । śaṁ no astu dvipade । śam catuṣapade ॥

ॐ शांतिः शांतिः शांतिः॥

om śāntiḥ śāntiḥ śāntiḥ ॥

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। सभूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाम्गुलं॥

om sahasraśīrṣā puruṣaḥ । sahasrākṣaḥ sahasrapāt । sabhūmiṁ viśvato vr̆tvā । atyatiṣṭhaddaśāmgulaṁ ॥

पुरुष एवेदग्ं सर्वं। यद्भूतं यच्च भव्यं। उतामृतत्वस्येशानः। यदन्नेनातिरोहति॥

puruṣa evedagṁ sarvaṁ । yadbhūtaṁ yacca bhavyaṁ । utāmr̆tatvasyeśānaḥ । yadannenātirohati ॥

एतावानस्य महिमा। अतो ज्यायाग्श्च पूरुषः। पादोऽस्य विश्वाभुतानि। त्रिपादस्यामृतं दिवि॥

etāvānasya mahimā । ato jyayāgśca pūruṣaḥ । pādo2sya viśvābhutāni । tripādasyāmr̆taṁ divi ॥

त्रिपादूर्ध्व उदैत्पुरुषः। पदोऽस्येहाऽऽभवात्पुनः। ततो विष्वंव्यक्रामत। साशनानशने अभि ॥

tripādūrdhva udaitpuruṣaḥ | pado2syehā22bhavātpunaḥ | tato viṣvaṁvyakrāmat | sāśanānaśane abhi ||

तस्माद्विराडजायत। विराजो अधि पूरुषः। सजातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः ॥

tasmādvirāḍajāyata | virājo adhi pūruṣaḥ| sajāto atyaricyata | paścādbhūmimatho puraḥ ||

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसंतो अस्यासीदाज्यं। ग्रीष्म इध्मश्शरद्धविः ॥

yatpuruṣeṇa haviṣā | devā yajñamatanvata | vasaṁto asyāsīdājyaṁ | grīṣma idhmaśśaraddhaviḥ ||

सप्तासयान्परिधयः। त्रिः सप्त समिधः क्त्ताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्-पुरुषं पशुं ॥

saptāsayānparidhayaḥ | triḥ sapta samidhaḥ kr̥tāḥ | devā yadyajñaṁ tanvānāḥ | abadhnan-puruṣaṁ paśuṁ ||

तम् यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः। तेन देवा अयजम्त। सध्या ऋषयश्च ये ॥

tam yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ | tena devā ayajamta | sadhyā r̥ṣayśca ye ||

तस्माद्यज्ञात्सर्व-हुतः । सम्भृत्तं पृषदाज्यम्। पशूग्स्ताग्श्चक्रे वायव्यान्। आरण्यान्-ग्राम्याश्च ये ॥

tasmādyajñātsarva-hutaḥ । sambhṛ̆taṁ pṛ̆ṣadājyam ।
paśūgstāgścakre vāyavyān । āraṇyān-grāmyāśca ye ।।

तस्माद्यज्ञात्सर्व-हुतः । ऋचः सामानि जिज्ञिरे । छंदाꣳसि जिज्ञिरे तस्मात् ।
यजुस्तस्मादजायत ॥

tasmādyajñātsarva-hutaḥ । ṛcaḥ sāmāni jijñire । chandāṁsi jijñire
tasmāt । yajustasmādajāyata ।।

त्स्मादश्वा अजायंत । ये के चोभयादतः । गावो ह जिज्ञिरे तस्मात् । तस्माज्जाता
अजावयः ॥

tsmādaśvā ajāyanta । ye ke cobhayādataḥ । gāvo ha jijñire tasmāt
। tasmājjātā ajāvayaḥ ।।

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बहू । कावूरू पादावुच्येते ॥

yatpuruṣaṁ vyadadhuḥ । katidhā vyakalpayan । mukhaṁ
kimasya kau bahū । kāvūrū pādāvucyete ।।

ब्राह्मणोऽस्य मुखमासीत् । बहू राजन्यः क्ऱ्तः । ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो
अजायत ॥

brāhmaṇo2sya mukhamāsīt । bahū rājanyaḥ kṛ̆taḥ । ūrū tadasya
yadvaiśyaḥ । padbhyāgṁ śūdro ajāyata ।।

चम्द्रमा मनसो जातः । चक्षोः सूर्यो अजाय्त । मुखादिंद्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥

camdramā manaso jātaḥ । cakṣoḥ sūryo ajāyta ।

mukhādindraścāgniśca । prāṇādvāyurajāyata ।।

नाभ्या आसीदम्तरिक्षं । शीर्ष्णो दौयोः समवर्त । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्म् अकल्पयन् ॥

nābhya āsīdamtarikṣaṁ । śīrṣno dauyoḥ samavarta । padbhyāṁ bhūmirdiśaḥ śrotrāt । tathā lokāgm akalpayan ।।

वेदाहमेतं पुरुषं महांतम् । आदित्यवर्णं तमसस्तु-पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि क्त्त्वाऽभिवदन् यदास्ते ॥

vedāhametaṁ puruṣaṁ mahāntam । ādityavarṇaṁ tamasastu-pāre । sarvāṇi rūpāṇi vicitya dhīraḥ । nāmāni kr̆tvā2bhivadan yadāste ।।

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्च-तस्त्रः । तमेवं विद्वानम्म्त इह भवति । नान्यः पंथा अयनाय विद्यते ॥

dhātā purastādyamudājahāra । śakraḥ pravidvānpradiśaśca-tasraḥ । tamevaṁ vidvānamr̥ta iha bhavati । nānyaḥ panthā ayanāya vidyate ।।

यज्ञेन यज्ञमयजंत देवाः । तानि धर्माणि प्रथमान्या-सन् । तेह नाकं महिमानः सचंते । यत्र पूर्वे साध्याः संति देवाः ॥

yajñena yajñamayajanta devāḥ । tāni dharmāṇi prathamānyā-san । teha nākaṁ mahimānaḥ sacante । yatra pūrve sādhyāḥ santi devāḥ ।।

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे॥

adbhyaḥ sambhūtaḥ pr̆thivyai rasācca | viśvakarmaṇaḥ samavartatādhi | tasya tvaṣṭā vidadhadrūpameti | tatpuruṣasya viśvamājānamagre ||

वेदाहमेतं पुरुषं महांतम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पंथा विद्यतेऽयनाय ॥

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasaḥ parastāt | tamevaṁ vidvānamr̆ta iha bhavati | nānyaḥ panthā vidyate2yanāya ||

प्रजापतिश्चरति गर्भे अंतः। अजायमानो बहुधा विजायते। तस्य धीराः परिजानंति योनिम्। मरीचीनां पदमिच्छंति वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मं जनयंतः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे॥

prajāpatiścarati garbhe antaḥ | ajāyamāno bahudhā vijāyate | tasya dhīrāḥ parijānanti yonim | marīcīnāṁ padamiccanti vedhasaḥ | yo devebhya ātapati | yo devānāṁ purohitaḥ | pūrvo yo devebhyo jātaḥ | namo rucāya brāhmaye | rucaṁ brāhmaṁ janayantaḥ | devā agre tadabruvan | yastvaivaṁ brāhmaṇo vidyāt | tasya devā asan vaśe ||

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपं। अश्विनौ व्यात्तं। इष्टम्

मनिषाण। अमुं मनिषाण। सर्वं मनिषाण।

hrīśca te lakṣmīśca patnyau | ahorātre pārśve | nakṣatrāṇi rūpam | aśvinau vyāttam | iṣṭam maniṣāṇa | amum maniṣāṇa | sarvam maniṣāṇa |

ॐ तच्चं योराव्र्णीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं। शं नो अस्तु द्विपदे। शम् चतुषपदे॥

om taccam yorāvr̆ṇīmahe | gātum yajñāya | gātum yajñapataye | daivī svastirastu naḥ | svastir-mānuṣebhyaḥ| ūrdhvam jigātu bheṣajam | śam no astu dvipade | śam catuṣapade ||

ॐ शांतिः शांतिः शांतिः॥

om śāntiḥ śāntiḥ śāntiḥ ||

श्रीसायीश्वराय नमः। हरिः ॐ।

śrīsāyīśvarāya namaḥ | hariḥ om |

ॐ सह ना ववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै॥

ॐ शांतिः शांतिः शांतिः॥

om saha nā vavatu | saha nau bhunaktu | saha vīryaṁ karavāvahai |
tejasvināvadhītamastu mā vidviṣāvahai ||
om śāntiḥ śāntiḥ śāntiḥ ||

ॐ सहस्रशीर्शं देवं विश्वाक्षं विश्वशंभुवं।

om sahasraśīrśaṁ devaṁ viśvākṣaṁ viśvaśambhuvaṁ |

विश्वं नारायणं देवमक्षरं परमं पदं। विश्वतः परमान्नित्यं विश्वं नारायणगं हरिं।

viśvaṁ nārāyaṇaṁ devamakṣaraṁ paramaṁ padaṁ | viśvataḥ paramānnityaṁ viśvaṁ nārāyaṇagṁ hariṁ |

विश्वमे वेदं पुरुष-स्तद्विश्व-मुपजीवति। पतिं विश्वस्यात्मेश्वरगं शाश्वतगं शिव-मच्युतं।

viśvame vedaṁ puruṣa-stadviśva-mupajīvati| patiṁ viśvasyātmeśvaragṁ śāśvatagṁ śiva-macyutaṁ |

नारायणं महाज्ञेयं विश्वात्मानं परायणं। नारायण परोज्योतिरात्मा नारायणः परः।

nārāyaṇaṁ mahājñeyaṁ viśvātmānaṁ parāyaṇaṁ | nārāyaṇa parojyotirātmā nārāyaṇaḥ paraḥ |

नारायण परंब्रह्म तत्त्वं नारायणः परः। नारायण परोध्याता ध्यानं नारायणः परः।

nārāyaṇa parambrahma tattvaṁ nārāyaṇaḥ paraḥ | nārāyaṇa parodhyātā dhyānaṁ nārāyaṇaḥ paraḥ |

यच्च किंचिज्जग-त्सर्वं दृश्यते श्रूयतेऽपि वा॥

yacca kiñcijjaga-tsarvaṁ dṛsyate śrūyate'pi vā ||

अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनंतमव्ययं कविगं समुद्रेऽंतं विश्वशंभुवं।

antarbahiśca tatsarvaṁ vyāpya nārāyaṇaḥ sthitaḥ | anantamavyayaṁ kavigṁ samudre'ntaṁ viśvaśambhuvaṁ |

पद्मकोश-प्रतीकाशगं हृदयं चाप्यथोमुखं। अथो निष्त्या वितस्त्यांते नाभ्यामुपरि तिष्ठति।

padmakośa-pratīkāśagṁ hṛdayaṁ cāpyathomukhaṁ | atho niṣtyā vitastyānte nābhyāmupari tiṣṭhati |

ज्वालमालाकुलं भाती विश्वस्यायतनं महत्। सन्ततगं शिलाभिस्तु लंबत्याकोशसन्निभं।

jvālamālākulaṁ bhātī viśvasyāyatanaṁ mahat | santatagṁ śilābhistu lambatyākośasannibhaṁ |

तस्यांते सुषिरगं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितं। तस्य मध्ये महानग्नि-र्विश्वार्चिर्विश्वतो मुखः।

tasyānte suṣiragṁ sūkṣmaṁ tasmin sarvaṁ pratiṣṭhitaṁ | tasya madhye mahānagni-rviśvārcirviśvato mukhaḥ |

सोऽग्रभुग्विभजंतिष्ठ-न्नाहारमजरः कविः। तिर्यगूर्ध्वमथश्शायी रश्मयस्तस्य संतता।

so'grabhugvibhajantiṣṭha-nnāhāramajaraḥ kaviḥ | tiryagūrdhvamathaśśāyī raśmayastasya santatā |

संतापयति स्वं देहमापादतलमस्तकः। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः।

santāpayati svaṁ dehamāpādatalamastakaḥ | tasya madhye vahniśikhā aṇīyordhvā vyavasthitaḥ |

नीलतो-यदमध्यस्था-द्विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा।

nīlato-yadamadhyasthā-dvidyullekheva bhāsvarā | nīvāraśūkavattanvī pītā bhāsvatyaṇūpamā |

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेंद्रः सोऽक्षः परमः स्वराट्॥

tasyāḥ śikhāyā madhye paramātmā vyavasthitaḥ | sa brahma sa śivaḥ sa hariḥ sendraḥ so'kṣaḥ paramaḥ svarāṭ ||

ऋतगं सत्यं परं ब्रह्म पुरुषं क्ष्णपिंगळं। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥

ṛtagṁ satyaṁ paraṁ brahma puruṣaṁ kr̥ṣṇapiṅgalaṁ | ūrdhvaretaṁ virūpākṣaṁ viśvarūpāya vai namo namaḥ ||

ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

om nārāyaṇāya vidmahe vāsudevāya dhīmahi | tanno viṣṇuḥ pracodayāt ||

ॐ सायीस्वराय विद्महे सत्यदेवाय धीमहि। तन्न स्सर्वः प्रचोदयात्॥ ३

om sāyīsvarāya vidmahe satyadevāya dhīmahi | tanna ssarvaḥ pracodayāt || (3)

ॐ शांतिः शांतिः शांतिः

om śāntiḥ śāntiḥ śāntiḥ

## क्षमा प्रार्थना [Kshamaa Prarthana]

**Introduction:**

*It is customary that every Vedam recitation session starts with the Ganapathi Prarthana and ends with a Kshama Prarthana. It is said that one incurs sin if there is any mis-spelt word or intonation in his chanting. To get redemption from all the sins and finally offering the fruits of his chanting, this prayer is done.*

ॐ यदक्षरपदभ्रष्टं मात्राहीनं तु यद् भवेत्। तत्सर्वं क्षम्यतां देव नारायण नमोस्तुते।

yadakṣarapadabhraṣṭaṁ mātrāhīnaṁ tu yad bhavet। tatsarvaṁ kṣamyatāṁ deva nārāyaṇa namostute

*Prostrations to You, O Lord Narayana. Forgive me for all the mistakes in letter or phrase or for any phonetic aberration that may have occurred in my chanting.*

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च। न्यूनानि चातिरिक्तानि क्षमस्व साईश्वर।

visargabindumātrāṇi padapādākṣarāṇi ca। nyūnāni cātiriktāni kṣamasva sāiiśvara।

*Forgive me, Oh! Sayeeswara, for any mistake in my pronunciation (of visarga (:), bindu (a)or intonation of alphabet, word or phrase and any other mistakes.*

अपराध सहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्वा क्षमस्व साईश्वर।

aparādha sahasrāṇi kriyante'harniśaṁ mayā। dāso'yamiti māṁ matvā kṣamasva sāyīśvara।

*Oh Sayeeswara, considering me as Your servant, forgive the thousands of sins committed by me through out the day and night.*

अन्यथा शरणं नास्ति त्वमेव शरणं मम। तस्मात् कारुण्य भावेन रक्ष रक्ष साईश्वर।

anyathā śaraṇaṁ nāsti tvameva śaraṇaṁ mama. tasmāt kāruṇya bhāvena rakṣa rakṣa sāyīśvara|

*You are my only refuge for there is none. Therefore, in Your compassion oh Sayeeswara, protect me.*

हरिः ॐ तत्स्त् श्री साईश्वरार्पणमस्तु।

hariḥ om tatst śrī sāyīśvarārpaṇamastu|

*You are my only refuge for there is none. Therefore, in Your compassion oh Sayeeswara, protect me.*

ॐ शान्तिः शान्तिः शान्तिः॥

om śāntiḥ śāntiḥ śāntiḥ||

*May there be peace to the body, mind and the Soul.*

स्वस्तिः प्रजाभ्यः परिपालयंतां। न्यायेण मार्गेण महिम् महीशाः।

गो ब्राह्मणेभ्यः शुभमस्तु नित्यं। समस्त लोकाः सुखिनो भवन्तु ३

svastiḥ prajābhyaḥ paripālayantāṁ | nyāyeṇa mārgeṇa mahim mahīśāḥ |
go brāhmaṇebhyaḥ śubhamastu nityaṁ| samasta lokāḥ sukhino bhavantu (3)

काले वर्षतु पर्जन्यः प्ऋथिवी सश्यशालिनी।

देशोयम् क्षोभरहितं। ब्राह्मणा स्सन्तु निर्भय

kāle varṣatu parjanyaḥ přithivī saśyaśālinī |
deśoyam kṣobharahitaṁ | brāhmaṇā ssantu nirbhaya

अपुत्राः पुतिणस्सन्तु पुत्रिण स्सन्तुपौत्रिणः

अधनाः सधनाः स्सन्तु जीवंतु शरदाश्शतं

aputrāḥ putiṇassantu putriṇa ssantupautriṇaḥ
adhanāḥ sadhanāḥ ssantu jīvantu śaradāśśataṁ

ॐ शांतिः शांतिः शांतिः
om śāntiḥ śāntiḥ śāntiḥ